# संस्कृतवार्ता:

दिनाङ्क:—२०१०.११.२५

प्रात:—०६.५५

प्रवाचक:/अनुवादक:/आलेखपरिष्कारक:— दिव्यानन्दझा:

आलेखपरिष्कारक:— निरञ्जनकुमार'निर्मल:'

इयमाकाशवाणी

सम्प्रति वार्ता: श्रूयन्ताम्

प्रवाचक:— दिव्यानन्दझा:

# मुख्यवार्ताः

- श्रीनीतीशकुमारः अनुक्रमं द्वितीयवारं बिहारस्य मुख्यमन्त्रित्वेन श्वः स्वीय–कार्यभारमावक्ष्यति।
- आन्ध्रप्रदेश–विधानसभाध्यक्षः एन्.किरणकुमाररेड्डी राज्यस्य नूतनो मुख्यमन्त्री भविता।
- भाजपा–दलं निगदति यत् बी.एस्.येदियुरप्पा कर्णाटकस्य मुख्यमन्त्रित्वेन स्थास्यति।

अपि च,

- चीनदेशस्य ग्वांग्झू–नगरे अनुवर्तमानासु षोडशीषु एशियाक्षेत्रीयक्रीडास्पर्धासु इदानीं यावत् भारतेन सप्त सुवर्णपदकानि, त्रयोदश राजतानि, षड्विंशतिश्च कांस्यपदकानि विजितानि।

## बिहारम्

श्रीनीतीशकुमारः अनुक्रमं द्वितीयवारं बिहारस्य मुख्यमन्त्रित्वेन श्वः स्वीय–कार्यभारमावक्ष्यति। बिहार–विधानसभायाः निर्वाचनपरिणामेषु जनतादलसंयुक्त–भाजपा–संयुतिः प्रशस्तं विजयम् अध्यगच्छत्। विधानसभायाः त्रिचत्वारिंशदुत्तर–द्विशतमितेषु स्थानेषु षडधिक–द्विशत–स्थानानि अवाप्य जनतादलसंयुक्त–भाजपा–संयुतिः इतिहासं व्यरचत्। संयुक्त–जनतादलेन पञ्चदशाधिक–शतमासनानि भाजपा–दलेन च एकनवतिः आसनानि अधिगतानि। तत्रैव राष्ट्रियजनतादलेन, लोकजनशक्तिपार्टीसंयुत्या, कॉन्ग्रेस्–दलेन च सुमहान् पराजयोऽभिमुखीकृतः।

मुख्यमन्त्री नीतीशकुमारः, उपमुख्यमन्त्री सुशीलकुमारमोदी, भाजपा–प्रदेशाध्यक्षः सी.पी.ठाकुरः, राष्ट्रियजनतादलाध्यक्षः लालूप्रसादयादवश्च ऐषमो विधानसभा–निर्वाचनेषु नैवास्पर्धन्त।

तत्रान्तरे, निर्वाचन–परिणामान् संलक्ष्य प्रतिक्रियमाणो भारतीय–जनतापार्टी–अध्यक्षः अवदत् यत् राज्ये राजनीतेः दिशाः विपरिवर्तन्ते इति तु सुस्पष्टम्। वंशवादोऽयं पराजयोन्मुखः विद्यते। श्रीनीतिनगडकरी अवदत् यत् जनतादलसंयुक्त–भाजपा–संयुतिः साफल्यम् अध्यगच्छत् इति तु नूनं देशस्य अनागतं नूतनां दिशामवाप्स्यति।

## कॉन्ग्रेस्दलम्

कॉन्ग्रेस्दलाध्यक्षा श्रीमती सोनियागान्धी जनतादलसंयुक्त–भाजपासंयुतिः विजयमाधृत्य नीतीशकुमारं वर्धापितवती। अपि च, न्यगादीत् यत् राज्ये कॉन्ग्रेस्दलम् एकाकि एव निर्वाचनानि स्पर्धितवत्, अपि चानेन नाधिकं साफल्यमभिकाङ्क्षितमासीत्।

प्रधानमन्त्री डॉ.मनमोहनसिंहः बिहारविधानसभा–निर्वाचनेषु अधिगत–प्रशस्त–विजयोपरि नीतीशकुमारम् अभ्यनन्दत्।

## नीतीशकुमारः

बिहारस्य मुख्यमन्त्री जनतादलसंयुक्तस्य वरिष्ठो नेता नीतीशकुमारः न्यगादीत् यत् बिहारवास्तव्याः राज्ये

प्रवर्तमानानि विकासकार्याणि सततमग्रेसारयितुमिच्छन्तीति तु निर्वाचनपरिणामैः सुस्पष्टम् अजायत।

## आन्ध्रप्रदेश–मुख्यमन्त्री

आन्ध्रप्रदेश–विधानसभाध्यक्षः एन्.किरणकुमार–रेड्डी राज्यस्य नूतनो मुख्यमन्त्री भविता। कॉन्ग्रेस्–दलस्य वरिष्ठो नेता प्रणवमुखर्जी ह्यो हैद्राबादे एतदुदघोषयत्।

ततः प्राक्, आन्ध्रप्रदेशस्य मुख्यमन्त्री के.रोसैय्या गतदिने स्वपदमत्यजत्। पूर्वम्, हैद्राबादे जनसम्मर्दसमाकुलिते वार्ताहरसम्मेलनेऽसौ एतद्विषयकं स्वीय निर्णयमुदघोषयत्। अनन्तरमसौ, स्वीयं त्यागपत्रं राज्यपालाय ई.एस्.एल्. नरसिम्हन्–महोदयाय आर्पयत् । अपि च, तत्कालमेव एनत् स्वीकर्तुं साग्रहमध्यार्थयत्।

त्यागपत्रप्रदानस्य कारणानि ख्यापयन् श्रीरोसैय्या अवदत् यत् वार्धक्यकारणात् कार्यापीडहेतोश्च असौ स्वपदं त्यक्तुं निरणैषीत्।

## येदियुरप्पा

भाजपादलं निगदति यत् बी.एस्.येदियुरप्पा कर्णाटकस्य मुख्यमन्त्रित्वेन स्थास्यति। वार्ताहरैः सम्भाषमाणः दल–प्रवक्ता प्रकाशजावडेकरः अवदत् यत् येदियुरप्पा–महोदये समाक्षिप्तान् आक्षेपान् भाजपादलम् अन्वीक्षिष्यते।

## संसद्

द्वि–जी–स्पैक्ट्रम्–आबण्टन–प्रवञ्चनाप्रकरणमाधृत्य अनुक्रमं ह्यः नवमेऽपि कार्यदिवसे संसदः सदनद्वयस्य कार्यजातं बाधितम्। संसदः सदनद्वयेऽपि विपक्षसांसदैः विषयोऽयमुत्थापितः। उग्रकोलाहलकारणाच्च सदनकार्यजातं स्थगितीकृतमासीत्।

## एशियाक्षेत्रीयाः क्रीडाः

चीनदेशस्य ग्वांग्झू–नगरे अनुवर्तमानासु षोडशीषु एशियाक्षेत्रीयक्रीडास्पर्धासु इदानीं यावत् भारतेन सप्त सुवर्णपदकानि, त्रयोदश राजतानि, षड्विंशतिश्च कांस्यपदकानि विजितानि। पदकतालिकायां, सम्प्रति भारतं दशमं स्थानं भजते।